# श्री सोमनाथसंस्कृत-युनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा, अक्तुबर - 2019

| | | |
|---|---|---|
| **कक्षा –** आचार्य-**2** | **सत्रम् – 3** | **गुणाः - 70** |
| **विषयः –** धर्मशास्त्रम् | **प्रश्नपत्रम् - 4 - CC - 5.3.9** | **समयः- 3 तः 6** |
| **दिनाङ्कः- 12/10/2019** | **सन्दर्भग्रन्थः –** गौतमधर्मसूत्रम् | |

**( प्रथमान्वितिः - युनिट-1 )**

**प्र-1 एकस्य ससंदर्भं व्याख्या कार्या । 05**

1. तद्विदां च स्मृतिशीले ।
2. प्राणायामस्त्रयः पञ्चदशमात्राः ।

**प्र-2 एकस्य निबन्धात्मकमुत्तरं लिखत । 10**

1. ब्राह्मणक्षत्रियवैश्यानामुपनयनकालः ग्रन्थोक्तदिशा लिखत ।
2. ग्रन्थोक्तरीत्या गुरुकुलवासनियमान् सविस्तरं वर्णयत ।

**( द्वितीयान्वितिः - युनिट-2 )**

**प्र-3 एकस्य व्याख्यानात्मकमुत्तरं लिखत । 05**

1. देवपितृमनृष्यभूतर्षिपूजकः ।
2. आपत्कल्पो ब्राह्मणस्याऽब्राह्मणाद् विद्योपयोगः ।

**प्र-4 एकस्य निबन्धात्मकमुत्तरं लिखत । 10**

1. गौतमधर्मसूत्रानुसारेण पञ्चमहायज्ञान् सविस्तरं ससूत्रं वर्णयत ।
2. अभिवादननिमयान् लिखित्वा सम्भाषणनियमान् सविस्तरं प्रतिपादयत ।

**( तृतीयान्वितिः - युनिट-3 )**

**प्र-5 एकस्य व्याख्यानात्मकमुत्तरं लिखत । 05**

1. द्वौ लोके धृतव्रतौ राजाब्राह्मणश्च बहुश्रुतः ।
2. आचार्य-ज्ञाति-प्रिय-गुरु-धनविद्यानियमेषु ब्रह्मणः सम्प्रदानमन्यत्र यथोक्तात् ।

**प्र-6 एकस्य निबन्धात्मकमुत्तरं लिखत । 10**

1. चत्वारिंशत् संस्कारैः संस्कृतो मनुष्यः बहुश्रुतः कथ्यते इति ससूत्रं वर्णयत ।
2. ग्रन्थोक्तरीत्या शयननियमं स्नाननियमञ्च वर्णयत । ससूत्रनिर्देशपुरस्सरम् ।

**प्र-7 एकस्य वर्णनं कुरुत । 05**

1. त्रय्यामान्वीक्षिक्यां चाऽभिविनीतः ।
2. विप्रतिपत्तौ साक्षिनिमित्तासत्यव्यवस्था ।

**(चतुर्थान्वितिः - युनिट-4 )**

**प्र-8 एकस्य वर्णनं कुरुत। 10**

1. राजगुणान् लिखित्वा राजधर्मान् सविस्तरं वर्णयत।
2. जननाशौचं लिखित्वा असपिण्डाद्याशौचं ग्रन्थानुसारं वर्णयत।

**(पञ्चमान्वितिः - युनिट- 5 )**

**प्र-9 दशानां लघूत्तराणि लिखत। 10**

1. गौतमसूत्रानुसारेण ब्राह्मणस्य उपनयनसंस्कारः कः
2. वर्षाणां संख्या कया रीत्या गण्यते
3. उपनयनं किं नाम जन्म कथ्यते
4. गौतमधर्मसूत्रस्य प्रथमे प्रश्ने कति अध्यायाः सन्ति
5. क्षत्रियस्य उपनयनसंस्कारे दण्डस्य प्रमाणं किम्
6. कदा कदा द्विराचमनं करणीयम्
7. गान्धर्वविवाहः कः कथ्यते
8. धर्म्याः विवाहाः कति, के च ते
9. स्त्रीणां गर्भग्रहणकालः कः
10. के पञ्चमहायज्ञाः
11. ऋत्विगादिषु गृहमागतेषु किं देयम्
12. पादोपसङ्ग्रहणं प्रतिदिनं कीदृशं कार्यम्
13. कः बहुश्रुतः कथ्यते
14. गौतमधर्मसूत्रस्य द्वितीयप्रश्ने कति अध्यायाः सन्ति
15. क्षत्रियवैश्याभ्यां ब्राह्मणस्य के अधिकाः धर्माः

************